पिनी ग्राह्या "तदभावे तु सायाह्नव्यापिनी परिगृह्यता-मिति" माधवोक्तेः कृष्णा तु परा "कृष्णा तूत्तरतोऽखिलेति" दीपिकोक्तेः कृष्णापि पूर्वैवेत्यनन्तभट्टाः ।

द्वितीया तु कृष्णा पूर्वा शुक्लोत्तरा इति हेमाद्रिः, कृष्णा द्वितीयादिमा "पूर्वाह्णे यदि सा सिता तु परतः सर्वा" इति दीपिकोक्तेः माधवानन्तभट्टमते तु सर्वापि द्वितीया परा तथा च माधवः "पूर्वेद्युरसती प्रातः परेद्युस्त्रिमुहूर्त्तगा । सा द्वितीया परोपोष्या पूर्वविद्धा ततोऽन्यथा" इति

तृतीया तु सर्व्वमते रम्भाव्यतिरिक्ता परैव तेन युग्म-वाक्यं रम्भाव्रतविषयम् "रम्भाख्यां वर्जयित्वा तु तृतीयां द्विजसत्तम ! अन्येषु सर्व्वकार्य्येषु गणयुक्ता प्रशस्यते इति ब्रह्मवैवर्तात् गौरीव्रते तु विशेषमाह माधवः "मुहूर्त्तमात्रसत्त्वेऽपि दिने गौरीव्रतं परे । शुद्धाधि-कायामप्येवं गणयोगप्रशंसनादिति" ।

चतुर्थ्यपि सर्व्वमते गणेशव्रतातिरिक्ता परैव युग्मवा-क्यात् "एकादशी तथा षष्ठी अमावास्या चतुर्थिका । उपोष्याः परसंयुक्ताः पराः पूर्व्वेण संयुताः" इति माध-वीये वृद्धवसिष्ठोक्तेश्च

नागचतुर्थी तु मध्याह्नव्यापिनी पञ्चमीयुता च ग्राह्या इति निर्णयामृते माधवीये चोक्तम् "युगं मध्यंदिने यत्र तत्रोपोष्य फणीश्वरान् । क्षीरेणाप्याय्य पञ्चम्यां पूजयेत् प्र-यतो नरः । विषाणि तस्य नश्यन्ति न तान् हिंसन्ति प-न्नगाः" इति माधवीये देवलोक्तेः युगं चतुर्थी । पूर्वत्र मध्याह्नव्याप्तौ पूर्वा अन्यपक्षेषु परैव पञ्चम्यां पूजोक्तेः गणेशव्रते तृतीयायुतैव चतुर्थी "चतुर्थी तु तृतीयायां महापुण्यफलप्रदा । कर्तव्या व्रतिभिर्वत्स ! गणनाथ सुतोषिणी" इति हेमाद्रौ ब्रह्मवैवर्त्तात् । माधवीये तु गणेशव्रते "मध्याह्नव्यापिनी मुख्या" चतुर्थी गणनाथस्य मातृविद्धा प्रशस्यते । मध्याह्नव्यापिनी चेत् स्यात् परत-श्चेत् परेऽहनि" इति बृहस्पतिवचनात् "प्रातः शुक्ल-तिलैः स्नात्वा मध्याह्ने पूजयेन्नृप !" इति "तत्कालेऽभि-धानाच्च तेन परदिने तथात्वे परा अन्यथा पूर्वेत्युक्तम् वस्तु-तस्तु यत्र भाद्रशुक्लचतुर्थ्यादौ गणेशव्रतविशेषे मध्याह्न-पूजोक्ता तद्विषयाण्येव प्रागुक्तवचनानि न तु सार्वत्रि-काणि । संकष्टचतुर्थ्यादौ बहूनां कर्मकालानां बाधापत्तेः तेन सर्वत्र गणेशव्रते पूर्वैवेति सिद्धम् । संकष्टचतुर्थी तु चन्द्रोदयव्यापिनी ग्राह्या दिनद्वये तथात्वे मातृयोगस्य सत्त्वात् पूर्वेति केचित् । अन्ये तु मुहूर्त्तत्रयादिरूपस्य तृतीयायोगस्याभावात्परदिने माधवोक्तमध्याह्नव्यापित्त्वात् संपूर्णत्वाच्च परेत्याचक्षते । दिनद्वये तदभावे तु परैव । गौरीव्रते तु पूर्वैव । "गणेशगौरीबहुलाव्यतिरिक्ताः प्र-कीर्त्तिताः । चतुर्थ्यः पञ्चमीविद्धा देवतान्तरयोगतः" इति मदनरत्ने ब्रह्मवैवर्त्तात्

पञ्चमी तु माधवमते सर्वापि पूर्वा "चतुर्थीसं-युता कार्या पञ्चमी परया न तु । दैवे कर्मणि पित्र्ये च शुक्लपक्षे तथा सितेति" हारीतोक्तेः हेमाद्रिमते तु कृष्णा पूर्वा सिता परा "कृष्णा पूर्वयुता सिता परयुता स्यात् पञ्चमी" इति दीपिकोक्तेः वस्तुतस्तु हारीतोक्तिरुपवासविषया "प्रतिपत्पञ्चमी चैव सावित्री-भूतपूर्णिमा । नवमी दशमी चैव नोपोष्याः परसंयुताः" इति ब्रह्मवैवर्तात् यत्तु "पञ्चमी तु प्रकर्तव्या षष्ठ्या युक्ता तु नारद !" इत्यापस्तम्बीयम् तत् स्कन्दव्रतपरम् "स्क-न्दोपवासे स्वीकार्या पञ्चमी परसंयुता" इति वाक्यशेषा-दिति माधवः तन्नागपूजाविषयमित्यनन्तभट्टनिर्णयामृता-दयः । चमत्कारचिन्तामणौ च "पञ्चमी नागपूजायां कार्या षष्ठीसमन्विता । तस्यान्तु तुषिता नागा इतरा सचतुर्थिका" इति तेन नागपूजादौ परैव । यत्तु मदन-रत्नदिवोदासीययोः श्रावणपञ्चम्यतिरिक्ता पूर्वेत्युक्तं "श्रावणे पञ्चमी शुक्ला संप्रोक्ता नागपञ्चमी । तां परि-त्यज्य पञ्चम्यश्चतुर्थीसहिता हिताः" इति संग्रहोक्तेः, "गणेशस्कन्दयोगाभ्यां क्रमान्नागः शुभाशुभः । सिता-सिते तयोः पत्ने नागानामाखुबर्हिणौ" इति षट्त्रिंश-न्मताच्च श्रावणपञ्चम्यतिरिक्तायाः नागपञ्चम्याश्चतुर्थीयुत-त्वमुक्तं तदुपवासादिविषयम् । पत्ने वाहने ।

षष्ठी सर्वमते स्कन्दव्रतातिरिक्ता परैव युग्मवाक्यात् "नागविद्धा न कर्तव्या षष्ठी चैव कदाचन" इति स्कान्दाच्च निर्णयामृते "षष्ठी च सप्तमी चैव वारश्चेदंशुमालिनः । योगोऽयं पद्मको नाम सूर्य्यकोटिग्रहैः समः" ।

सप्तमी पूर्वैव युग्मवाक्यात् "षष्ठ्या युता सप्तमी च कर्तव्या तात ! सर्वदा" इति स्कान्दाच्च ।

अष्टमी तु सर्वमते कृष्णा पूर्वा सिता परा "व्रत-मात्रेऽष्टमी कृष्णा पूर्वा शुक्लाष्टमी परा" इति माधवोक्तेः "परयुक् शुक्लाष्टमी पूर्वयुक् कृष्णा" इति दीपिकोक्तेश्च शिवशक्त्युत्सवे तु कृष्णाप्युत्तरा "पक्षद्वयेऽप्युत्तरैव शिवशक्तिमहोत्सवः" इति माध-वोक्तेः दिवोदासीये भविष्ये "यदा यदा सिताष्टम्यां